# बृहत्तर-वैदिक-अध्ययन-परिषदा समायोजिता परिचर्चा

## विषयः –प्राचीनसंस्कृतज्ञाने वर्तमानसमस्यानां निदानम्

“बृहत्तर-वैदिक-अध्ययन-परिषद्”(**WAVES**)तथा संस्कृतविभागः (दक्षिणपरिसरः), दिल्लीविश्वविद्यालयः इत्यनयोः संयुक्ततत्त्वावधानेन **“प्राचीनसंस्कृतज्ञाने वर्तमानसमस्यानां निदानम्”** इति विषयमाधृत्य एकदिवसीया परिचर्चा१२.८.२०१७ दिनांके दिल्लीविश्वविद्यालयदक्षिणपरिसरस्थस्य कलासंकायस्य सभागारे समायोजिता। संस्कृतविभागीयैः छात्रैः समाचरिताभ्यां वैदिक-लौकिकमंगलाचरणाभ्यां परिचर्चेयं समारब्धा। प्रो. रमेशचन्द्रभारद्वाजः परिचर्चासत्रेऽस्मिन् आध्यक्ष्यपदं निर्व्यूढवान्। कार्यक्रमेऽस्मिन् मुख्यातिथिपदमलंकृतवान् फ्रान्सदेशीयो वैदिकविद्वान् तथा वर्ल्ड अफेयर्स जर्नल इत्यस्याः पत्रिकायाः सम्पादकश्च डॉ. कोमे कर्पेंटीर डे गोर्डेनवर्यः।परिचर्चायामस्यां वक्तारोऽवर्तन्त बृहत्तर-वैदिक-अध्ययन-परिषदः (वेव्ज) अध्यक्षा तथा राष्ट्रपतिसम्मानेन विभूषिता प्रो. शशितिवारी, बृहत्तर-वैदिक-अध्ययन-परिषदः पूर्व-उपाध्यक्षः प्रो. लल्लनप्रसादः, प्रो. आर.एस. कौशलः तथा बृहत्तर-वैदिक-अध्ययन-परिषदः सचिवः (शैक्षणिकः) डॉ. रणजितबेहेरा। कार्यक्रमस्यास्य संचालकःडॉ.रणजितबेहेरा समेषां स्वागतं व्यदधात्।




परिचर्चासत्रस्य प्रारम्भे कार्यक्रमस्योद्देश्येन साकं स्वमतान्युपस्थापयत् बेहेरामहोदयः। तदनु स्वकीये व्याख्याने प्रो. लल्लनप्रसादोऽभणत् यदधुना यादृश्यर्थव्यवस्था वर्तते तथा

तत्सम्बन्धिताः याः समस्याः दरीदृश्यन्ते तासां सर्वासां समस्यानां समाधानं संस्कृतेनैव सम्भविष्यत्येव।

वेव्जइति संस्थायाअध्यक्षया प्रो. शशितिवारीमहोदयया सम्यगुदीरितं यत् वैश्विकपरिप्रेक्ष्ये संस्कृतस्यैव महती भूमिका वरिवर्तते। संस्कृतवाङ्मये सर्वविधं ज्ञानं निहितमेव। स्वकीये वक्तव्ये चतुर्दशविद्यानां विषयेऽपि चर्चा विहिता। मानवानां कृते अध्यात्मज्ञानम् अपरिहार्यमेव। ज्ञानमेनदेव सर्वेषु संस्कृतशास्त्रेषु समधिकं विवर्णितम्। व्याकरणशास्त्रे अध्यात्मचेतना अपादानकारकोदाहरणेन प्रतिपादिता प्रो. तिवारीमहोदयया। पुनः तया भणितं यदायुर्वेदीयचिकित्साः साम्प्रतिके समाजे बहूपकारका एव। वक्तव्यस्यान्ते संस्कृतभाषायाः वैश्विकं स्वरूपं सोदाहरणं प्रस्तुतम्।




तदनु समैरतिथिभिः वेव्ज-वार्षिक-समाचारपत्रस्य विमोचनं कृतम्। अस्य समाचारपत्रस्य सम्पादकाः वर्तन्ते – प्रो. शशितिवारी, डॉ. धर्मा, डॉ. रणजितबेहेरा, डॉ. अपर्णाधीरमहोदया तथा सुश्री सुरुचिः।




मुख्यातिथिपदमलंकृवता फ्रेंच-विदुषा डॉ. कोमे कर्पेंटीर डे गोर्डेनवर्येण प्रोक्तं यत् संस्कृतं भारतीयपरम्परायाः प्रतिनिधित्वं विदधाति। संस्कृतं संस्कृतेः पर्यायं वर्तते यत् भारतस्यैकत्वं निर्दिशति। पाश्चात्यैर्विद्वद्भिः वैज्ञानिकदृष्ट्यर्थं न्याय-

वैशेषिकादिदर्शनानां महत्ता स्वीकृता।

डॉ. आर. एस. कौशलमहोदयः प्रावोचत् यत् विज्ञानस्य रहस्यानि प्राचीनदार्शनिक-सिद्धान्तैरवगन्तुं शक्यन्ते। सुश्री सुरुचिमहोदयया वेव्ज-तरुणतरंगस्य विविधान् कार्यक्रमानधृत्य दृश्य-श्रव्यमयी प्रस्तुतिः प्रदत्ता।

प्रो. रमेशचन्द्रभारद्वाजवर्यैरध्यक्षीयभाषणे प्रोक्तं यत् सर्वाषां भारतीयभाषाणां साहित्यस्य प्रतिपाद्यविषयाः संस्कृताधारिताः सन्ति। संस्कृतसाहित्ये यत् निर्दिष्टं तदन्यभारतीयसाहित्येषु प्रतिफलितमिति प्रायः प्रतीयते। राजनीति-अर्थशास्त्रादयः आधुनिकविषयाः प्राचीनसंस्कृतसाहित्ये विलिखिताः। सिद्धान्ता इमे आधुनिकशिक्षाविषयेषु समावेशनीयाः। संस्कृतग्रन्थाः समाजस्यावश्यकतापूर्तये सहायकसिद्धाः भविष्यन्ति। अस्माकं मूलधर्मो वर्तते 'कर्मवादः'। कर्मणः प्राधान्यं स्वीक्रियते चेत् नैकासां समस्यानां निराकरणं स्वतः सम्भविष्यति।



परिचर्चायामस्यांडॉ. धर्मा, डॉ. वेदवती वैदिकमहोदया, डॉ. अंजूसेठमहोदया, डॉ.सुषमा चौधरी, डॉ. विजयशंकरद्विवेदी, डॉ. सोमवीरः, डॉ. करुणा आर्या, श्री प्रेमदेवली, श्री विकासशर्मा,सुश्री सुरुचिशर्मा-प्रभृतयोऽशीत्यधिको विद्वांसो विदुष्यश्च भागमवहन्। अन्ते वेव्ज-तरुणतरंगाध्यक्ष्यस्यडॉ. विजयशंकरद्विवेदिनः धन्यवादज्ञापनेन तथा विभागीयानां छात्राणां शान्तिपाठेन च परिचर्चेयं समाप्तिमधिगता।



रिपोर्ट द्वारा -

डा. रणजित बेहेरा

सचिवः (शैक्षणिकः)

बृहत्तर-वैदिक-अध्ययन-परिषद् (**WAVES**)

**(**एसोसिएट प्रोफेसर, संस्कृतविभागः, दिल्ली-विश्वविद्यालयः**)**